रुद्राध्याय स्तुतिः (रुद्र नमक स्तोत्रं)

रुद्राध्याय स्तुतिः (रुद्र नमक स्तोत्रं)

ध्यानं |
आपाताळ नभः स्थलांत भुवन ब्रह्मांडमाविस्फुर-
-ज्ज्योतिःस्फाटिकलिंग मौळिविलसत् पूर्णेंदु वांतामृतैः |
अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकान् जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिंचेच्छिवं ||

ब्रह्मांडव्याप्तदेहा भसित हिमरुचा भासमाना भुजंगैः
कंठे कालाः कपर्दाः कलितशशिकलाश्चंड कोदंड हस्ताः |
त्र्यक्षा रुद्राक्षमालाः सुललितवपुषः शांभवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्त प्रकटित विभवाः नः प्रयच्छंतु सौख्यं ||

इत्युक्त्वा सत्वरं सांबं स्मृत्वा शंकरपादुके |
ध्यात्वा ययौ गणाधीशः शिवसन्निधिमादरात् ||

ततः प्रणम्य बहुधा कृतांजलिपुटः प्रभुं |
शंभुं स्तोतुं मतिं चक्रे सर्वाभीष्टप्रदायकं ||

गणेश उवाच |
नमस्ते देवदेवाय नमस्ते रुद्रमन्यवे |
नमस्ते चंद्रचूडायाप्युतोत इषवे नमः || 1 ||

नमस्ते पार्वतीकांतायैकरूपाय धन्वने | [मेरुधन्वने]
नमस्ते भगवन् शंभो बाहुभ्यामुत ते नमः || 2 ||

इषुः शिवतमा या ते तया मृडाय रुद्र मां |
शिवं धनुर्यद्बभूव तेनापि मृडयाधुना || 3 ||

शरव्या या शिवतमा तयापि मृडय प्रभो |
या ते रुद्र शिवा नित्यं सर्वमंगळसाधनं || 4 ||

तयाभिचाकशीहि त्वं तनुवा मामुमापते |
अघोरयापि तनुवा रुद्राद्या पापकाशिनी || 5 ||

या तया मृडय स्वामिन् सदा शंतमया प्रभो |
गिरिशंतं महारुद्र हस्ते यामिषुमस्तवे || 6 ||

बिभर्षि तां गिरित्राद्य शिवां कुरु शिवापते |
शिवेन वचसा रुद्र नित्यं वाचा वदामसि || 7 ||

त्वद्भक्ति परिपूतांगं महिंसीः पुरुषं जगत् |
यच्च शर्व जगत्सर्वमयक्ष्मं सुमना असत् || 8 ||

यथा तथावमां रुद्र तदन्यधापि मे प्रभो |
रुद्र त्वं प्रथमो दैव्यो भिषक् पापविनाशकः || 9 ||

अधिवक्ताऽध्यवोचन्मां भावलिंगार्चकं मुदा |
अहीन् सर्वान् यातु धान्यः सर्वा अप्यद्य जंभयन् || 10 ||

असौ ताम्रोरुणो बभ्रुः नीलग्रीवः सुमंगळः |
विलोहितोस्त्वयं शंभो त्वदधिष्ठान एव हि || 11 ||

नमो नमस्ते भगवन् नीलग्रीवाय मीढुषे |
सहस्राक्षाय शुद्धाय सच्चिदानंदमूर्तये || 12 ||

उभयोगार्त्नियोर्ज्या या धन्वनस्तां प्रमुंचतां |
संप्राप्य धनुरन्येषां भयाय प्रभविष्यति || 13 ||

अस्मद्भय विनाशार्थ मधुनाभयद प्रभो |
याश्च ते हस्त इषवः परता भगवो वाप || 14 ||

अवतत्य धनुश्च त्वं सहस्राक्ष शतेषुधे |
मुखा निशीर्य शल्यानां शिवो नः सुमना भव || 15 ||

विज्यं धनुरिदं भूयात् विशल्यो बाणवानपि |
अनेशन्निषवश्चापि ह्याभुरस्तु निषंगथिः || 16 ||

कपर्दिनो महेशस्य यदि नाभुर्निषंगथिः |
इषवो पि समर्थाश्चेत् सामर्थ्येतु भयं भवेत् || 17 ||

या ते हेतिर्धनुर्हस्ते मीढुष्टम बभूव या |
तयाऽस्मान् विश्वतस्तेन पालय त्वमयक्ष्मया || 18 ||

अनाततायायुधाय नमस्ते धृष्णवे नमः |
बाहुभ्यां धन्वने शंभो नमो भूयो नमो नमः || 19 ||

परिते धन्वनो हेतिः विश्वतोऽस्मान् वृणक्तु नः |
इषुधिस्तव या तावदस्मदारे निधेहि तं || 20 ||

हिरण्यबाहवे तुभ्यं सेनान्ये ते नमो नमः |
दिशां च पतये तुभ्यं पशूनां पतये नमः || 21 ||

त्विषीमते नमस्तुभ्यं नमः सस्पिंजराय ते |
नमः पथीनां पतये बभ्लुशाय नमो नमः || 22 ||

नमो विव्याधिनेन्नानां पतये प्रभवे नमः |
नमस्ते हरिकेशाय रुद्रायास्तूपवीतिने || 23 ||

पुष्टानां पतये तुभ्यं जगतां पतये नमः |
संसार हेति रूपाय रुद्रायाप्याततायिने || 24 ||

क्षेत्राणां पतये तुभ्यं सूताय सुकृतात्मने |
अहंत्याय नमस्तुभ्यं वनानां पतये नमः || 25 ||

रोहिताय स्थपतये मंत्रिणे वाणिजाय च |
कक्षाणां पतये तुभ्यं नमस्तुभ्यं भुवंतये || 26 ||

तद्वारिवस्कृतायास्तु महादेवाय ते नमः |
ओषाधीनां च पतये नमस्तुभ्यं महात्मने || 27 ||

उच्चैर्घोषाय धीराय धीरान् क्रंदयते नमः || 28 ||

पत्तीनां पतये तुभ्यं कृत्स्नवीताय ते नमः |
धावते धवलायापि सत्त्वनां पतये नमः || 29 ||

आव्याधिनीनां पतये ककुभाय निषंगिणे |
स्तेनानां पतये तुभ्यं दिव्येषुधिमते नमः || 30 ||

तस्कराणां च पतये वंचते परिवंचते |
स्तायूनां पतये तुभ्यं नमस्तेऽस्तु निचेरवे || 31 ||

नमः परिचरायाऽपि महारुद्राय ते नमः |
अरण्यानां च पतये मुष्णतां पतये नमः || 32 ||

उष्णीषिणे नमस्तुभ्यं नमो गिरिचराय ते |
कुलुंचानां च पतये नमस्तुभ्यं भवाय च || 33 ||

नमो रुद्राय शर्वाय तुभ्यं पशुपते नमः |
नम उग्राय भीमाय नमश्चाग्रेवधाय च || 34 ||

नमो दूरेवधायाऽपि नमो हंत्रे नमो नमः |
हनीयसे नमस्तुभ्यं नीलग्रीवाय ते नमः || 35 ||

नमस्ते शितिकंठाय नमस्तेऽस्तु कपर्दिने |
नमस्ते व्युप्तकेशाय सहस्राक्षाय मीढुषे || 36 ||

गिरिशाय नमस्तेऽस्तु शिपिविष्टाय ते नमः |
नमस्ते शंभवे तुभ्यं मयोभव नमोऽस्तु ते || 37 ||

मयस्कर नमस्तुभ्यं शंकराय नमो नमः |
नमः शिवाय शर्वाय नमः शिवतराय च || 38 ||

नमस्तीर्थ्याय कूल्याय नमः पार्याय ते नमः |
आवार्याय नमस्तेऽस्तु नमः प्रतरणाय च || 39 ||

नम उत्तरणायाऽपि हरातार्याय ते नमः |
आलाद्याय नमस्तेऽस्तु भक्तानां वरदाय च || 40 ||

नमः शष्प्याय फेन्याय सिकत्याय नमो नमः |
प्रवाह्याय नमस्तेऽस्तु ह्रस्वायाऽस्तु नमो नमः || 41 ||

वामनाय नमस्तेऽस्तु बृहते च नमो नमः |
वर्षीयसे नमस्तेऽस्तु नमो वृद्धाय ते नमः || 42 ||

संवृध्वने नमस्तुभ्यमग्रियाय नमो नमः |
प्रथमाय नमस्तुभ्यमाशवे चाजिराय च || 43 ||

शीघ्रियाय नमस्तेऽस्तु शीभ्याय च नमो नमः |
नम ऊर्म्याय शर्वायाऽप्यवस्वन्याय ते नमः || 44 ||

स्रोतस्याय नमस्तुभ्यं द्वीप्याय च नमो नमः |
ज्येष्ठाय च नमस्तुभ्यं कनिष्ठाय नमो नमः || 45 ||

पूर्वजाय नमस्तुभ्यं नमोस्त्वपरजाय च |
मध्यमाय नमस्तुभ्यमपगल्भाय ते नमः || 46 ||

जघन्याय नमस्तुभ्यं बुध्नियाय नमो नमः |
सोभ्याय प्रतिसर्याय याम्याय च नमो नमः || 47 ||

क्षेम्याय च नमस्तुभ्यं याम्याय च नमो नमः |
उर्वर्याय नमस्तुभ्यं खल्याय च नमो नमः || 48 ||

श्लोक्याय चावसान्यायावस्वन्याय च ते नमः |
नमो वन्याय कक्ष्याय मौंज्याय च नमो नमः || 49 ||

श्रवाय च नमस्तुभ्यं प्रतिश्रव नमो नमः |
आशुषेणाय शूराय नमोस्त्वाऽशुरथाय च || 50 ||

वरूथिने पर्मिणे च बिल्मिने च नमो नमः |
श्रुताय श्रुतसेनाय नमः कवचिने नमः || 51 ||

दुंदुभ्याय नमस्तुभ्यमाहनन्याय ते नमः |
प्रहिताय नमस्तुभ्यं धृष्णवे प्रमृशाय च || 52 ||

पाराय पारविंदाय नमस्तीक्ष्णेषवे नमः |
सुधन्वने नमस्तुभ्यं स्वायुधाय नमो नमः || 53 ||

नमः स्रुत्याय पथ्याय नमः काट्याय ते नमः |
नमो नीप्याय सूद्याय सरस्याय च ते नमः || 54 ||

नमो नाद्याय भव्याय वैशंताय नमो नमः |
अवट्याय नमस्तुभ्यं नमः कूप्याय ते नमः || 55 ||

अवर्ष्याय च वर्ष्याय मेघ्याय च नमो नमः |
विद्युत्याय नमस्तुभ्यमीध्रियाय नमो नमः || 56 ||

आतप्याय नमस्तुभ्यं वात्याय च नमो नमः |
रेष्मियाय नमस्तुभ्यं वास्तव्याय च ते नमः || 57 ||

वास्तुपाय नमस्तुभ्यं नमः सोमाय ते नमः |
नमो रुद्राय ताम्रायाऽप्यरुणाय च ते नमः || 58 ||

नम उग्राय भीमाय नमः शंगाय ते नमः |
नमस्तीर्थ्याय कूल्याय सिकत्याय नमो नमः || 59 ||

प्रवाह्याय नमस्तुभ्यमिरिण्याय नमो नमः |
नमस्ते चंद्रचूडाय प्रपथ्याय नमो नमः || 60 ||

किंशिलाय नमस्तेऽस्तु क्षयणाय च ते नमः |
कपर्दिने नमस्तेऽस्तु नमस्तेऽस्तु पुलस्तये || 61 ||

नमो गोष्ठ्याय गृह्याय ग्रहाणां पतये नमः |
नमस्तल्प्याय गेह्याय गुहावासाय ते नमः || 62 ||

काट्याय गह्वरेष्ठाय ह्रदय्याय च ते नमः |
निवेष्प्याय नमस्तुभ्यं पांसव्याय ते नमः || 63 ||

रजस्याय नमस्तुभ्यं परात्पर तराय च |
नमस्ते हरिकेशाय शुष्क्याय च नमो नमः || 64 ||

हरित्याय नमस्तुभ्यं हरिद्वर्णाय ते नमः |
नमः उर्म्याय सूर्म्याय पर्ण्याय च नमो नमः || 65 ||

नमोपगुरमाणाय पर्णशद्याय ते नमः |
अभिघ्नते चाख्खिदते नमः प्रख्खिदते नमः || 66 ||

विश्वरूपाय विश्वाय विश्वाधाराय ते नमः |
त्र्यंबकाय च रुद्राय गिरिजापतये नमः || 67 ||

मणिकोटीरकोटिस्थ कांतिदीप्ताय ते नमः |
वेदवेदांत वेद्याय वृषारूढाय ते नमः || 68 ||

अविज्ञेयस्वरूपाय सुंदराय नमो नमः |
उमाकांत नमस्तेऽस्तु नमस्ते सर्वसाक्षिणे || 69 ||

हिरण्यबाहवे तुभ्यं हिरण्याभरणाय च |
नमो हिरण्यरूपाय रूपातीताय ते नमः || 70 ||

हिरण्यपतये तुभ्यमंबिकापतये नमः |
उमायाः पतये तुभ्यं नमः पापप्रणाशक || 71 ||

मीढुष्टमाय दुर्गाय कद्रुद्राय प्रचेतसे |
तव्यसे बिल्वपूज्याय नमः कळ्याणरूपिणे || 72 ||

अपार कळ्याण गुणार्णवाय
श्री नीलकंठाय निरंजनाय |
कालांतकायापि नमो नमस्ते
दिक्कालरूपाय नमो नमस्ते || 73 ||

वेदांतबृंदस्तुत सद्गुणाय
गुणप्रवीणाय गुणाश्रयाय |
श्री विश्वनाथाय नमो नमस्ते
काशीनिवासाय नमो नमस्ते || 74 ||

अमेय सौंदर्य सुधानिधान
समृद्धिरूपाय नमो नमस्ते |
धराधराकार नमो नमस्ते
धारास्वरूपाय नमो नमस्ते || 75 ||

नीहार शैलात्मज हृद्विहार
प्रकाशहार प्रविभासि वीर |
वीरेश्वरापार दयानिधान
पाहि प्रभो पाहि नमो नमस्ते || 76 ||

व्यास उवाच |
एवं स्तुत्वा महादेवं प्रणिपत्य पुनः पुनः |
कृतांजलिपुटस्तस्थौ पार्श्वे डुंठिविनायकः || 77 ||

तमालोक्य सुतं प्राप्तं वेदं वेदांगपारगं |
स्नेहाश्रुधारा संवीतं प्राह डुंठिं सदाशिवः || 78 ||

इति श्री शिवरहस्ये हराख्ये तृतीयांशे पूर्वार्थे गणेशकृत रुद्राध्याय स्तुतिः नाम दशमोऽध्यायः |
अनेन श्रीगणेशकृत श्लोकात्मक रुद्रध्याय पारायणेन श्री विश्वेश्वरः सुप्रीतः सुप्रसन्नो वरदो भवतु |